# ॥ શિક્ષાપત્રી સહજાનન્દસ્વામીવિરચિતા ॥

.. shikShApatrI sahajAnandasvAmIvirachitA ..

sanskritdocuments.org

August 2, 2016

.. shikShApatrI sahajAnandasvAmIvirachitA ..

# ॥ શિક્ષાપત્રી સહજાનન્દસ્વામીવિરચિતા ॥

## Document Information

Text title : shikShApatrI sahajAnandasvAmIvirachitA
File name : shikShApatrIsahajAnanda.itx
Location : doc_deities_misc
Author : sahajAnandasvAmI
Language : Sanskrit
Subject : philosophy/hinduism/religion
Proofread by : DPD
Description-comments : Shree Swaminarayan Sampradaya
Latest update : August 23, 2015
Send corrections to : sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

sanskritdocuments.org

# ॥ શિક્ષાપત્રી સહજાનન્દસ્વામીવિરચિતા ॥

॥ ધ્યાનશ્લોકાઃ ॥

વિજ્ઞાને વિલયં ગતે પ્રસરતિ ક્ષોણ્યાં તમસ્યાન્તરે
દિઙ્મૂઢેષુ ભવાધ્વગેષુ પરિતઃ પીડૈકશેષે વિધૌ ।
કારુણ્યાદવતીર્ય મુક્તિજનનીં શિક્ષામદાધ્યામિમાં
સાક્ષાદક્ષરદિવ્યધામનિલયસ્તામન્વહં ચિન્તયે ॥ ૧॥

સંસારકર્દમવિવર્તનપઙ્કિલાનાં
નૈર્મલ્યમાકલયિતું રચિતાવતારામ્ ।
આવિદ્યસન્તમસનિર્હરણે સમર્થા-
માદેશપત્રિ ભવતીમનુચિન્તયામિ ॥ ૨॥

કાઽપ્યઞ્જનશલાકેયમન્તસ્તિમિરહારિણી ।
પ્રજ્ઞાદૃષ્ટિપ્રકાશાય શિક્ષાપત્ર્યુપસેવ્યતામ્ ॥ ૩ ॥

નાનાદેશનિવાસિશિષ્યજનતામુદ્દિશ્ય યાઽઽવિષ્કૃતા
સાક્ષાદક્ષરવાસિના નૃવપુષા નારાયણેન સ્વયમ્ ।
સા ત્વં સઙ્ગ્રથિતાસિ પાવનિ શતાનન્દર્ષિણા ગ્રન્થતઃ
શિક્ષાપત્રિ ભવાપહન્ત્રિ ભવતીમમ્બાન્વહં ચિન્તયે ॥ ૪॥

શતાનન્દેન મુનિના મધ્યેસત્સઙ્ગિજીવનમ્ ।
ગ્રથિતાં ભગવત્પ્રોક્તાં શિક્ષાપત્રીમહં શ્રયે ॥ ૫॥

સમસ્તશાસ્ત્રદુગ્ધાબ્ધ્યોદ્ધૃતમનુત્તમમ્ ।
શિક્ષાપત્ર્યમૃતં કિઞ્ચિદમૃતત્વાય કલ્પતે ॥ ૬॥

શિક્ષાપત્ર્યમૃતં યદેવ સહજાનન્દઃ શરણ્યઃ સતા
દેવઃ પ્રાશયદાશ્રિતાનિહ મુકુન્દાનન્દમુખ્યાન્ પૂરા ।
યત્પીત્વા પ્રભવન્તિ સમ્પદમનાયાસેન તામાસુરી -
મુચ્છેત્તું તદુપાસ્મહે ભવભયપ્રધ્વંસનૈકૌષધમ્ ॥ ૭॥

સંસારસાગરગતાન્સ્વયમુદ્દિધીર્ષુઃ
શ્રેયસ્તદેકમખિલેષ્વભિકાઙ્ક્ષમાણઃ ।
આદેશમાલિખિતુમાદૃતપત્રલેખો
નારાયણઃ સ્ફુરતુ મે હૃદિ વર્ણિવેષઃ ॥ ૮॥

વ્યઞ્જયન્તાશ્રિતસ્નેહં મુગ્ધસ્મિતમુખામ્બુજઃ ।
આદેશમાલિખન્નસ્તુ હૃદિ મે ધર્મનન્દનઃ ॥ ૯॥

સ્વામિનારાયણસ્યૈતત્ સ્વરુપમપરં હરેઃ ।

શિક્ષાપત્ર્યાત્મના ભૂમૌ ચકાસ્ત્વખિલમઙ્ગલમ્ ॥ ૧૦॥

શિક્ષાપત્રિ સમસ્તશિષ્યનિવહૈરભ્યર્થિતેનાદરાદ્
દેવેનાખિલકારણેન સહજાનન્દેન યાઽઽવિષ્કૃતા ।
તાં ત્વાં સર્વફલપ્રદાં ભગવતો દેવસ્ય તસ્યાપરાં
મૂર્તિં દેવિ વિભાવયન્નનુદિનં સેવે મુહુઃ પ્રેમતઃ ॥ ૧૧॥

શિક્ષાપત્ર્યમૃત હિતાય જગતામાવિષ્કૃતં યન્મયા
મદ્ભક્તૈરિદમાદરાદનુદિનં સેવ્યં સમસ્તૈરપિ ।
ઇત્યાદિષ્ટમનુસ્મરન્ ભગવતઃ પ્રેમ્ણાઽન્વહં યઃ પઠેત્
શિક્ષાપત્રમિદં સ યાતિ પરમ ધામાક્ષરં શાશ્વતમ્ ॥ ૧૨॥

॥ અથ શિક્ષાપત્રી ॥

વામે યસ્ય સ્થિતા રાધા શ્રીશ્ચ યસ્યાસ્તિ વક્ષસિ ।
વૃન્દાવનવિહારં તં શ્રીકૃષ્ણં હૃદિ ચિન્તયે ॥ ૧॥

લિખામિ સહજાનન્દસ્વામી સર્વાન્નિજાશ્રિતાન્ ।
નાનાદેશસ્વિતાન્ શિક્ષાપત્રીં વૃત્તાલયસ્થિતઃ ॥ ૨॥

ભ્રાત્રો રામપ્રતાપેચ્છારામયોર્ધર્મજન્મનોઃ ।
યાવયોધ્યાપ્રસાદાખ્યરઘુવીરાભિધૌ સુતૌ ॥ ૩॥

મુકુન્દાનન્દમુખ્યાશ્ચ નૈષ્ઠિકા બ્રહ્મચારિણઃ ।
ગૃહસ્થાશ્ચ મયારામભટ્ટાદ્યા યે મદાશ્રયાઃ ॥ ૪॥

સધવા વિધવા યોષા યાશ્ચ મચ્છિષ્યતાં ગતાઃ ।
મુક્તાનન્દાદયો યે સ્યુઃ સાધવશ્ચાખિલા અપિ ॥ ૫॥

સ્વધર્મરક્ષિકા મે તૈઃ સર્વૈર્વાચ્યાઃ સદાશિષઃ ।
શ્રીમન્નારાયણસ્મૃત્યા સહિતાઃ શાસ્ત્રસમ્મતાઃ ॥ ૬॥

એકાગ્રેણૈવ મનસા પત્રીલેખઃ સહેતુકઃ ।
અવધાર્યોઽયમખિલૈઃ સર્વજીવહિતાવહઃ ॥ ૭॥

યે પાલયન્તિ મનુજાઃ સચ્છાસ્ત્રપ્રતિપાદિતાન્ ।
સદાચારાન્ સદા તેઽત્ર પરત્ર ચ મહાસુખાઃ ॥ ૮॥

તાનુઽલઙ્ઘ્યાઽત્ર વર્તન્તે યે તુ સ્વૈરં કુબુદ્ધયઃ ।
ત ઇહામુત્ર વ મહલ્લભન્તે કષ્ટમેવ હિ ॥ ૯॥

અતો ભવદ્ભિર્મચ્છિષ્યૈઃ સાવધાનતયાઽખિલૈઃ ।
પ્રીત્યૈતામનુસૃત્યૈવ વર્તિતવ્યં નિરન્તરમ્ ॥ ૧૦॥

કસ્યાપિ પ્રાણિનો હિંસા નૈવ કાર્યાઽત્ર મામકૈઃ ।
સૂક્ષ્મયૂકામત્કુણાદેરપિ બુદ્ધ્યા કદાચન ॥ ૧૧॥

દેવતાપિતૃયાગાર્થમપ્યજાદેશ્ચ હિંસનમ્ ।
ન કર્તવ્યમહિંસૈવ ધર્મઃ પ્રોક્તોઽસ્તિ યન્મહાન્ ॥ ૧૨॥

સ્ત્રિયા ધનસ્ય વા પ્રાપ્ત્યૈ સામ્રાજ્યસ્યાપિ વા ક્વચિત્ ।
મનુષ્યસ્ય તુ કસ્યાપિ હિંસા કાર્યા ન સર્વથા ॥ ૧૩ ॥

આત્મઘાતસ્તુ તીર્થેઽપિ ન કર્તવ્યશ્ચ ન ક્રુધા ।
અયોગ્યાચરણાત્ ક્વાપિ ન વિષોદ્બન્ધનાદિના ॥ ૧૪॥

ન ભક્ષ્યં સર્વથા માંસં યજ્ઞશિષ્ટમપિ ક્વચિત્ ।
ન પેયં ચ સુરામદ્યમપિ દેવનિવેદિતમ્ ॥ ૧૫॥

અકાર્યાચરણે ક્વાપિ જાતે સ્વસ્ય પરસ્ય વા ।
અઙ્ગચ્છેદો ન કર્તવ્યઃ શસ્ત્રાદ્યૈશ્ચ ક્રુધાઽપિ વા ॥ ૧૬॥

સ્તેનકર્મ ન કર્તવ્યં ધર્માર્થમપિ કેનચિત્ ।
સસ્વામિકાષ્ઠપુષ્પાદિ ન ગ્રાહ્યં તદનાજ્ઞયા ॥ ૧૭॥

વ્યભિચારો ન કર્તવ્યઃ પુમ્ભિઃ સ્ત્રિભિશ્ચ મા શ્રિતૈઃ ।
દ્યૂતાદિ વ્યસન ત્યાજ્યં નાદ્યં ભઙ્ગાદિમાદકમ્ ॥ ૧૮॥

અગ્રાહ્યાન્નેન પક્વં યદન્નં તદુદકં ચ ન ।
જગન્નાથપુરં હિત્વા ગ્રાહ્યં કૃષ્ણપ્રસાદ્યપિ ॥ ૧૯॥

મિથ્યાપવાદઃ કસ્મિંશ્ચિદપિ સ્વાર્થસ્ય સિદ્ધયે ।
નારોપ્યો નાપશવ્યાશ્ચ ભાષણીયાઃ કદાચન ॥ ૨૦॥

દેવતાતીર્થવિપ્રાણાં સાધ્વીનાં ચ સતામપિ ।
વેદાનાં ન ચ કર્તવ્યા નિન્દા શ્રવ્યા ન ચ ક્વચિત્ ॥ ૨૧॥

દેવતાયૈ ભવેદ્યસ્યૈ સુરામાંસનિવેદનમ્ ।
યત્પુરોઽજાદિહિંસા ચ ન ભક્ષ્યં તન્નિવેદિતમ્ ॥ ૨૨॥

દૃષ્ટ્વા શિવાલયાદીનિ દેવાગારાણિ વર્ત્મનિ ।
પ્રણમ્ય તાનિ તદ્દેવદર્શનં કાર્યમાદરાત્ ॥ ૨૩ ॥

સ્વવર્ણાશ્રમધર્મો યઃ સ હાતવ્યો ન કેનચિત્ ।
પરધર્મો ન ચાચર્યો ન ચ પાખણ્ડકલ્પિતઃ ॥ ૨૪॥

કૃષ્ણભક્તેઃ સ્વધર્માદ્વા પતનં યસ્ય વાક્યતઃ ।
સ્યાત્તન્મુખાન્ન વૈ શ્રવ્યાઃ કથાવાર્તાશ્ચ વા પ્રભોઃ ॥ ૨૫॥

સ્વપરદ્રોહજનનં સત્યં ભાષ્યં ન કર્હિચિત્ ।
કૃતઘ્નસઙ્ગસ્ત્યક્તવ્યો લુબ્ધા ગ્રાહ્યા ન કસ્યચિત્ ॥ ૨૬॥

ચોરપાપિવ્યસનિનાં સઙ્ગઃ પાખણ્ડિનાં તથા ।
કામિનાં ચ ન કર્તવ્યો જનવઞ્ચનકર્મણામ્ ॥ ૨૭॥

ભક્તિં વા જ્ઞાનમાલમ્બ્ય સ્ત્રીદ્રવ્યરસલોલુભાઃ ।
પાપે પ્રવર્તમાનાઃ સ્યુઃ કાર્યસ્તેષાં ન સઙ્ગમઃ ॥ ૨૮॥

કૃષ્ણકૃષ્ણાવતારાણાં ખણ્ડનં યત્ર યુક્તિભિઃ ।
કૃતં સ્યાત્તાનિ શાસ્રાણિ ન માન્યાનિ કદાચન ॥ ૨૯॥

અગાલિતં ન પાતવ્યં પાનીયં ચ પયસ્તથા ।
સ્નાનાદિ નૈવ કર્તવ્યં સૂક્ષ્મજન્તુમયામ્ભસા ॥ ૩૦॥

યદૌષધં ચ સુરયા સમ્પૃક્તં પલલેન વા ।
અજ્ઞાતવૃત્તવૈદ્યેન દત્તં ચાદ્યં ન તત્ ક્વચિત્ ॥ ૩૧॥

સ્થાનેષુ લોકશાસ્ત્રાભ્યાં નિષિદ્ધેષુ કદાચન ।
મલમૂત્રોત્સર્જનં ચ ન કાર્યં ષ્ઠીવનં તથા ॥ ૩૨॥

અદ્વારેણ ન નિર્ગમ્ય પ્રવેષ્ટવ્યં ન તેન ચ ।
સ્થાને સસ્વામિકે વાસઃ કાર્યોઽપૃષ્ટ્વા ન તત્પતિમ્ ॥ ૩૩॥

જ્ઞાનવાર્તાશ્રુતિર્નાર્યા મુખાત્ કાર્યા ન પૂરુષૈઃ ।
ન વિવાદઃ સ્ત્રિયા કાર્યો ન રાજ્ઞા ન ચ તજ્જનૈઃ ॥ ૩૪॥

અપમાનો ન કર્તવ્યો ગુરૂણાં ચ વરીયસામ્ ।
લોકે પ્રતિષ્ઠિતાનાં ચ વિદુષાં શસ્ત્રધારિણામ્ ॥ ૩૫॥

કાર્યં ન સહસા કિઞ્ચિત્ કાર્યો ધર્મસ્તુ સત્વરમ્ ।
પાઠનીયાઽધીતવિદ્યા કાર્યઃ સઙ્ગોઽન્વહં સતામ્ ॥ ૩૬॥

ગુરુદેવનૃપેક્ષાર્થં ન ગમ્યં રિક્તપાણિભિઃ ।
વિશ્વાસઘાતો નો કાર્યઃ સ્વશ્લાઘા સ્વમુખેન ચ ॥ ૩૭॥

યસ્મિન્ પરિહિતેઽપિ સ્યુર્દૃશ્યાન્યઙ્ગાનિ ચાત્મનઃ ।
તદ્દૂષ્યં વસનં નૈવ પરિધાર્યં મદાશ્રિતૈઃ ॥ ૩૮॥

ધર્મેણ રહિતા કૃષ્ણભક્તિઃ કાર્યા ન સર્વથા ।
અજ્ઞનિન્દાભયાન્નૈવ ત્યાજ્યં શ્રીકૃષ્ણસેવનમ્ ॥ ૩૯॥

ઉત્સવાહેષુ નિત્યં ચ કૃષ્ણમન્દિરમાગતૈઃ ।
પુમ્ભિઃ સ્પૃશ્યા ન વનિતાસ્તત્ર તાભિશ્ચ પૂરુષાઃ ॥ ૪૦॥

કૃષ્ણદીક્ષાં ગુરોઃ પ્રાપ્તૈસ્તુલસીમાલિકે ગલે ।
ધાર્યે નિત્યં ચોર્ધ્વપુણ્ડ્રં લલાટાદૌ દ્વિજાતિભિઃ ॥ ૪૧॥

તત્તુ ગોપીચન્દનેન ચન્દનેનાથવા હરેઃ ।
કાર્યં પૂજાવશિષ્ટેન કેસરાદિયુતેન ચ ॥ ૪૨॥

તન્મધ્ય એવ કર્તવ્યઃ પુણ્ડ્રદ્રવ્યેણ ચન્દ્રકઃ ।
કુઙ્કુમેનાથવા વૃત્તો રાધાલક્ષ્મીપ્રસાદિના ॥ ૪૩॥

સચ્છૂદ્રાઃ કૃષ્ણભક્તા યે તૈસ્તુ માલોર્ધ્વપુણ્ડ્રકે ।
દ્વિજાતિવદ્ધારણીયે નિજધર્મેષુ સંસ્થિતૈઃ ॥ ૪૪॥

ભક્તૈસ્તદિતરૈર્માલે ચન્દનાદીન્ધનોદ્ભવે ।
ધાર્યે કણ્ઠે લલાટેઽથ કાર્યઃ કેવલચન્દ્રકઃ ॥ ૪૫॥

ત્રિપુણ્ડ્રરુદ્રાક્ષધૃતિર્યેષાં સ્યાત્ સ્વકુલાગતા ।
તૈસ્તુ વિપ્રાદિભિઃ ક્વાપિ ન ત્યાજ્યા સા મદાશ્રિતૈઃ ॥ ૪૬॥

ઐકાત્મ્યમેવ વિજ્ઞેય નારાયણમહેશયોઃ ।
ઉભયોર્બ્રહ્મરૂપેણ વેદેષુ પ્રતિપાદનાત્ ॥ ૪૭॥

શાસ્ત્રોક્ત આપદ્ધર્મો યઃ સ ત્વલ્પાપદિ કર્હિચિત્ ।
મદાશ્રિતૈર્મુખ્યતયા ગ્રહીતવ્યો ન માનવૈઃ ॥ ૪૮॥

પ્રત્યહં તુ પ્રબોદ્ધવ્યં પૂર્વમેવોદયાદ્રવે ।
વિધાય કૃષ્ણસ્મરણં કાર્યઃ શૌચવિધિસ્તતઃ ॥ ૪૯॥

ઉપવિશ્યૈવ ચૈકત્ર કર્તવ્યં દન્તધાવનમ્ ।
સ્નાત્વા શુચ્યમ્બુના ધૌતે પરિધાર્યે ચ વાસસી ॥ ૫૦॥

ઉપવિશ્ય તતઃ શુદ્ધ આસને શુચિભૂતલે ।
અસઙ્કીર્ણ ઉપસ્પૃશ્યં પ્રાઙ્મુખં વોત્તરામુખમ્ ॥ ૫૧॥

કર્તવ્યમૂર્ધ્વપુણ્ડ્રં ચ પુમ્ભિરેવ સચન્દ્રકમ્ ।
કાર્યઃ સધવનારીભિર્ભાલે કુઙ્કુમચન્દ્રકઃ ॥ ૫૨॥

પુણ્ડ્રં વા ચન્દ્રકો ભાલે ન કાર્યો મૃતનાથયા ।
મનસા પૂજનં કાર્યં તતઃ કૃષ્ણસ્ય ચાખિલૈઃ ॥ ૫૩॥

પ્રણમ્ય રાધાકૃષ્ણસ્ય લેખ્યાર્ચાં તત આદરાત્ ।
શક્ત્યા જપિત્વા તન્મન્ત્રં કર્તવ્યં વ્યાવહારિકમ્ ॥ ૫૪॥

યે ત્વમ્બરિષવદ્ભક્તાઃ સ્યુરિહાત્મનિવેદિનઃ ।
તૈશ્ચ માનસપૂજાન્તં કાર્યમુક્તક્રમેણ વૈ ॥ ૫૫॥

શૈલી વા ધાતુજા મૂર્તિઃ શાલગ્રામોઽર્ચ્ય એવ તૈઃ ।
દ્રવ્યૈર્યથાપ્તૈઃ કૃષ્ણસ્ય જપ્યોઽથાષ્ટાક્ષરો મનુઃ ॥ ૫૬॥

સ્તોત્રાદેરથ કૃષ્ણસ્ય પાઠઃ કાર્યઃ સ્વશક્તિતઃ ।
તથાઽનધિતગીર્વાણૈઃ કાર્યં તન્નામકીર્તનમ્ ॥ ૫૭॥

હરેર્વિધાય નૈવેદ્યં ભોજ્યં પ્રાસાદિક તતઃ ।
કૃષ્ણસેવાપરૈઃ પ્રીત્યા ભવિતવ્યં ચ તૈઃ સદા ॥ ૫૮॥

પ્રોક્તાસ્તે નિર્ગુણા ભક્તા નિર્ગુણસ્ય હરેર્યતઃ ।
સમ્બન્ધાતત્ક્રિયાઃ સર્વા ભવન્ત્યેવ હિ નિર્ગુણાઃ ॥ ૫૯॥

ભક્તૈરેતૈસ્તુ કૃષ્ણાયાનર્પિતં વાર્યપિ ક્વચિત્ ।
ન પેયં નૈવ ભક્ષ્યં ચ પત્રકન્દફલાદ્યપિ ॥ ૬૦॥

સર્વૈરશક્તૌ વાર્ધક્યાદ્ ગરીયસ્યાપદાઽથવા ।
ભક્તાય કૃષ્ણમન્યસ્મૈ દત્ત્વા વૃત્યં યથાબલમ્ ॥ ૬૧॥

આચાર્યેણૈવ દત્તં યદ્ યચ્ચ તેન પ્રતિષ્ઠિતમ્ ।
કૃષ્ણસ્વરૂપં તત્ સેવ્યં વન્દ્યમેવેતરત્તુ યત્ ॥ ૬૨॥

ભગવન્મન્દિરં સર્વૈઃ સાયં ગન્તવ્યમન્વહમ્ ।
નામસઙ્કીર્તનં કાર્યં તત્રોચ્ચૈ રાધિકાપતેઃ ॥ ૬૩॥

કાર્યાસ્તસ્ય કથાવાર્તાઃ શ્રવ્યાશ્ચ પરમાદરાત્ ।
વાદિત્રસહિતં કાર્યં કૃષ્ણકીર્તનમુત્સવે ॥ ૬૪॥

પ્રત્યહં કાર્યમિત્થં હિ સર્વૈરપિ મદાશ્રિતૈઃ ।
સંસ્કૃતપ્રાકૃતગ્રન્થાભ્યાસશ્ચાપિ યથામતિ ॥ ૬૫॥

યાદૃશૈર્યો ગુણૈર્યુક્તસ્તાદૃશે સ તુ કર્મણિ ।
યોજનીયો વિચાર્યૈવ નાન્યથા તુ કદાચન ॥ ૬૬॥

અન્નવસ્ત્રાદિભિઃ સર્વે સ્વકીયાઃ પરિચારકાઃ ।
સમ્ભાવનીયાઃ સતતં યથાયોગ્યં યથાધનમ્ ॥ ૬૭॥

યાદૃગ્ગુણો યઃ પુરુષસ્તાદૃશા વચનેન સઃ ।
દેશકાલાનુસારેણ ભાષણીયો ન ચાન્યથા ॥ ૬૮॥

ગુરુભૂપાલવર્ષિષ્ઠત્યાગિવિદ્વત્તપસ્વિનામ્ ।
અભ્યુત્થાનાદિના કાર્યઃ સન્માનો વિનયાન્વિતૈઃ ॥ ૬૯॥

નોરૌ કૃત્વા પાદમેકં ગુરુદેવનૃપાન્તિકે ।

ઉપવેશ્યં સભાયાં ચ જાનૂ બદ્ધ્વા ન વાસસા ॥ ૭૦॥

વિવાદો નવ કર્તવ્યઃ સ્વાચાર્યેણ સહ ક્વચિત્ ।
પૂજ્યોઽન્નધનવસ્ત્રાદ્યૈર્યથાશક્તિ સ ચાખિલૈઃ ॥ ૭૧॥

તમાયાન્તં નિશમ્યાશુ પ્રત્યુદ્ગન્તવ્યમાદરાત્ ।
તસ્મિન્ યાત્યનુગમ્યં ચ ગ્રામાન્તાવધિ મચ્છ્રિતૈઃ ॥ ૭૨॥

અપિ ભૂરિફલં કર્મ ધર્માપેતં ભવેદ્યદિ ।
આચર્યં તર્હિ તન્નૈવ ધર્મઃ સર્વાર્થદોઽસ્તિ હિ ॥ ૭૩॥

પૂર્વૈર્મહદ્ભિરપિ યવધર્માચરણં ક્વચિત્ ।
કૃતં સ્યાત્તત્તુ ન ગ્રાહ્યં ગ્રાહ્યો ધર્મસ્તુ તત્કૃતઃ ॥ ૭૪॥

ગુહ્યવાર્તા તુ કસ્યાપિ પ્રકાશ્યા નૈવ કુત્રચિત્ ।
સમદૃષ્ટ્યા ન કાર્યશ્ચ યથાર્હાર્ચાવ્યતિક્રમઃ ॥ ૭૫॥

વિશેષનિયમો ધાર્યશ્ચાતુર્માસ્યેઽખિલૈરપિ ।
એકસ્મિન્ શ્રાવણે માસિ સ ત્વશક્તૈસ્તુ માનવૈઃ ॥ ૭૬॥

વિષ્ણોઃ કથાયાઃ શ્રવણં વાચનં ગુણકીર્તનમ્ ।
મહાપૂજા મન્ત્રજપઃ સ્તોત્રપાઠઃ પ્રદક્ષિણાઃ ॥ ૭૭॥

સાષ્ટાઙ્ગપ્રણતિશ્ચેતિ નિયમા ઉત્તમા મતાઃ ।
એતેષ્વેકતમો ભક્ત્યા ધારણીયો વિશેષતઃ ॥ ૭૮॥

એકાદશીનાં સર્વાસાં કર્તવ્યં વ્રતમાદરાત્ ।
કૃષ્ણજન્મદિનાનાં ચ શિવરાત્રેશ્ચ સોત્સવમ્ ॥ ૭૯॥

ઉપવાસદિને ત્યાજ્યા દિવાનિદ્રા પ્રયત્નતઃ ।
ઉપવાસસ્તયા નશ્યેન્મૈથુનેનૈવ યન્નૃણામ્ ॥ ૮૦॥

સર્વવૈષ્ણવરાજશ્રીવલ્લભાચાર્યનન્દનઃ ।
શ્રીવિઠ્ઠલેશઃ કૃતવાન્ યં વ્રતોત્સવનિર્ણયમ્ ॥ ૮૧॥

કાર્યાસ્તમનુસૃત્યૈવ સર્વ એવ વ્રતોત્સવાઃ ।
સેવારીતિશ્ચ કૃષ્ણસ્ય ગ્રાહ્યા તદુદિતૈવ હિ ॥ ૮૨॥

કર્તવ્યા દ્વારિકામુખ્યતીર્થયાત્રા યથાવિધિ ।
સર્વૈરપિ યથાશક્તિ ભાવ્યં દીનેષુ વત્સલૈઃ ॥ ૮૩॥

વિષ્ણુઃ શિવો ગણપતિઃ પાર્વતી ચ દિવાકરઃ ।
એતાઃ પૂજ્યતયા માન્યા દેવતાઃ પઞ્ચ મામકૈઃ ॥ ૮૪॥

ભૂતાદ્યુપદ્રવે ક્વાપિ વર્મ નારાયણાત્મકમ્ ।

જપ્યં ચ હનુમન્મન્ત્રો જપ્યો ન ક્ષુદ્રદેવતઃ ॥ ૮૫॥

રવેરિન્દોશ્ચોપરાગે જાયમાનેઽપરાઃ ક્રિયાઃ ।
હિત્વાશુ શુચિભિઃ સર્વૈઃ કાર્યઃ કૃષ્ણમનોર્જપઃ ॥ ૮૬॥

જાતાયામથ તન્મુક્તૌ કૃત્વા સ્નાનં સચેલકમ્ ।
દેયં દાન ગૃહિજનૈઃ શક્ત્યાઽન્યૈસ્ત્વર્ચ્ય ઈશ્વરઃ ॥ ૮૭॥

જન્માશૌચં મૃતાશૌચં સ્વસમ્બન્ધાનુસારતઃ ।
પાલનીયં યથાશાસ્ત્રં ચાતુર્વર્ણ્યજનૈર્મમ ॥ ૮૮॥

ભાવ્યં શમદમક્ષાન્તિસન્તોષાદિગાગાન્વિતૈઃ ।
બ્રાહ્મણૈઃ શૌર્યધૈર્યાદિગુણોપેતૈશ્ચ બાહુજૈઃ ॥ ૮૯॥

વૈશ્યૈશ્ચ કૃષિવાણિજ્યકુસીદમુખવૃત્તિભિઃ ।
ભવિતવ્યં તથા શૂદ્રૈર્દ્વિજસેવાદિવૃત્તિભિઃ ॥ ૯૦॥

સંસ્કારાશ્ચાહ્નિકં શ્રાદ્ધં યથાકાલં યથાધનમ્ ।
સ્વસ્વગૃહ્યાનુસારેણ કર્તવ્યં ચ દ્વિજન્મભિઃ ॥ ૯૧॥

અજ્ઞાનાજ્જ્ઞાનતો વાઽપિ ગુરુ વા લઘુ પાતકમ્ ।
ક્વાપિ સ્યાત્તર્હિ તત્પ્રાયશ્ચિત્તં કાર્યં સ્વશક્તિતઃ ॥ ૯૨॥

વેદાશ્ચ વ્યાસસૂત્રાણિ શ્રીમદ્ભાગવતાભિધમ્ ।
પુરાણં ભારતે તુ શ્રીવિષ્ણોર્નામસહસ્રકમ્ ॥ ૯૩॥

તથા શ્રીભગવદ્ગીતા નીતિશ્ચ વિદુરોદિતા ।
શ્રીવાસુદેવમાહાત્મ્ય સ્કાન્દવૈષ્ણવખણ્ડગમ્ ॥ ૯૪॥

ધર્મશાસ્ત્રાન્તર્ગતા ચ યાજ્ઞવલ્ક્યઋષેઃ સ્મૃતિઃ ।
એતાન્યષ્ટ મમેષ્ટાનિ સચ્છાસ્રાણિ ભવન્તિ હિ ॥ ૯૫॥

સ્વહિતેચ્છુભિરેતાનિ મચ્છિષ્યૈઃ સકલૈરપિ ।
શ્રોતવ્યાન્યથ પાઠ્યાનિ કથનીયાનિ ચ દ્વિજૈઃ ॥ ૯૬॥

તત્રાચારવ્યવહૃતિનિષ્કૃતાનાં ચ નિર્ણયે ।
ગ્રાહ્યા મિતાક્ષરોપેતા યાજ્ઞવલ્ક્યસ્ય તુ સ્મૃતિઃ ॥ ૯૭॥

શ્રીમદ્ભાગવતસ્યૈષુ સ્કન્ધૌ દશમપઞ્ચમો ।
સર્વાધિકતયા જ્ઞેયૌ કૃષ્ણમાહાત્મ્યબુદ્ધયે ॥ ૯૮॥

દશમઃ પઞ્ચમઃ સ્કન્ધો યાજ્ઞવલ્ક્યસ્ય ચ સ્મૃતિઃ ।
ભક્તિશાસ્ત્રં યોગશાસ્ત્રં ધર્મશાસ્ત્રં ક્રમેણ મે ॥ ૯૯॥

શારીરકાણાં ભગવદ્ગીતાયાશ્ચાવગમ્યતામ્ ।

રામાનુજાચાર્યકૃત ભાષ્યમાધ્વાત્મિકં મમ ॥ ૧૦૦॥

એતેષુ યાનિ વાક્યાનિ શ્રીકૃષ્ણસ્ય વૃષસ્ય ચ ।
અત્યુત્કર્ષપરાણિ સ્યુસ્તથા ભક્તિવિરાગયોઃ ॥ ૧૦૧॥

મન્તવ્યાનિ પ્રમાણાનિ તાન્યેવેતરવાક્યતઃ ।
ધર્મેણ સહિતા કૃષ્ણભક્તિઃકાર્યેતિ તદ્રહઃ ॥ ૧૦૨॥

ધર્મો જ્ઞેયઃ સદાચારઃ શ્રુતિસ્મૃત્યુપપાદિતઃ ।
માહાત્મ્યજ્ઞાનયુગ્ભૂરિસ્નેહો ભક્તિશ્ચ માધવે ॥ ૧૦૩॥

વૈરાગ્યં જ્ઞેયમપ્રીતિઃ શ્રીકૃષ્ણેતરવસ્તુષુ ।
જ્ઞાનં ચ જીવમાયેશરૂપાણાં સુષ્ઠુ વેદનમ્ ॥ ૧૦૪॥

હૃત્સ્થોઽનુસૂક્ષ્મશ્ચિદ્રૂપો જ્ઞાતા વ્યાપ્યાખિલાં તનુમ્ ।
જ્ઞાનશક્ત્યા સ્થિતો જીવો જ્ઞેયોઽદ્છેદ્યાદિલક્ષણઃ ॥ ૧૦૫॥

ત્રિગુણાત્મા તમઃ કૃષ્ણશક્તિર્દેહસ્તદીયયોઃ ।
જીવસ્ય ચાહં મમતાહેતુર્માયાવગમ્યતામ્ ॥ ૧૦૬॥

હૃદયે જીવવજ્જીવે યોઽન્તર્યામિતયા સ્થિતઃ ।
જ્ઞેયઃ સ્વતન્ત્ર ઈશોઽસૌ સર્વકર્મફલપ્રદઃ ॥ ૧૦૭॥

સ શ્રીકૃષ્ણઃ પરમ્બ્રહ્મ ભગવાન્ પુરુષોત્તમઃ ।
ઉપાસ્ય ઇષ્ટદેવો નઃ સર્વાવિર્ભાવકારણમ્ ॥ ૧૦૮॥

સ રાધયા યુતો જ્ઞેયો રાધાકૃષ્ણ ઽત પ્રષુઃ ।
રુક્મિણ્યા રમયોપેતો લક્ષ્મીનારાયણઃ સ હિ ॥ ૧૦૯॥

જ્ઞેયોઽર્જુનેન યુક્તોઽસૌ નરનારાયણાભિધઃ ।
બલભદ્રાદિયોગેન તત્તન્નામોચ્યતે સ ચ ॥ ૧૧૦॥

એતે રાધાદયો ભક્તાસ્તસ્ય સ્યુઃ પાર્શ્વતઃ ક્વચિત્ ।
ક્વચિત્તદઙ્ગેઽતિસ્નેહાત્ સ તુ જ્ઞેયસ્તદૈકલઃ ॥ ૧૧૧॥

અતશ્ચાસ્ય સ્વરૂપેષુ ભેદો જ્ઞેયો ન સર્વથા ।
ચતુરાદિભુજત્વં તુ દ્વિબાહોસ્તસ્ય ચૈચ્છિકમ્ ॥ ૧૧૨॥

તસ્યૈવ સર્વથા ભક્તિઃ કર્તવ્યા મનુજૈર્ભુવિ ।
નિઃશ્રેયસકરં કિઞ્ચિત્તતોઽન્યન્નેતિ દૃશ્યતામ્ ॥ ૧૧૩॥

ગુણિનાં ગુણવત્તાયા જ્ઞેયં હ્યેતત્ પરં ફલમ્ ।
કૃષ્ણે ભક્તિશ્ચ સત્સઙ્ગોઽન્યથા યાન્તિ વિદોઽપ્યધઃ ॥ ૧૧૪॥

કૃષ્ણસ્તદવતારાશ્ચ ધ્યેયાસ્તત્પ્રતિમાઽપિ ચ ।

ન તુ જીવા નૃદેવાદ્યા ભક્તા બ્રહ્મવિદોઽપિ ચ ॥ ૧૧૫॥

નિજાત્માનં બ્રહ્મરૂપં દેહત્રયવિલક્ષણમ્ ।
વિભાવ્ય તેન કર્તવ્યા ભક્તિઃ કૃષ્ણસ્ય સર્વદા ॥ ૧૧૬॥

શ્રવ્યઃ શ્રીમદ્ભાગવતદશમસ્કન્ધ આદરાત્ ।
પ્રત્યહં વા સકૃદ્વર્ષે વર્ષે વાચ્યોઽથ પણ્ડિતૈઃ ॥ ૧૧૭॥

કારણીયા પુરશ્ચર્યા પુણ્યસ્થાનેઽસ્ય શક્તિતઃ ।
વિસ્તુનામસહસ્રાદેશ્ચાપિ કાર્યેપ્સિતપ્રદા ॥ ૧૧૮॥

દૈવ્યામાપદિ કષ્ટાયાં માનુષ્યાં વાગવાદિષુ ।
યથા સ્વપરરક્ષા સ્યાત્તથા વૃત્યં ન ચાન્યથા ॥ ૧૧૯॥

દેશકાલવયોવિત્તજાતિશક્ત્યનુસારતઃ ।
આચારો વ્યવહારશ્ચ નિષ્કૃતં ચારધાર્યતામ્ ॥ ૧૨૦॥

મતં વિશિષ્ટાદ્વૈતં મે ગોલોકો ધામ ચેપ્સિતમ્ ।
તત્ર બ્રહ્માત્મના કૃષ્ણસેવા મુક્તિશ્ચ ગમ્યતામ્ ॥ ૧૨૧॥

એતે સાધારણા ધર્માઃ સ્ત્રીણાં પુસાં ચ સર્વતઃ ।
મદાશ્રિતાનાં કથિતા વિશેષાનથ કીર્તયે ॥ ૧૨૨॥

મજ્જેષ્ઠાવરભ્રાતૃસુતાભ્યાં તુ કદાચન ।
સ્વાસન્નસમ્બન્ધહીના નોપદેશ્યા હિ યોષિતઃ ॥ ૧૨૩ ॥

ન સ્પૃષ્ટવ્યાશ્ચ તાઃ ક્વાપિ ભાષણીયાશ્ચ તા નહિ ।
ક્રૌર્યં કાર્યં ન કસ્મિંશ્ચિન્યાસો રક્ષ્યો ન કસ્યચિત્ ॥ ૧૨૪॥

પ્રતિભૂત્વં ન કસ્યાપિ કાર્યં ચ વ્યાવહારિકમ્ ।
ભિક્ષયાઽઽપદતિક્રમ્યા ન તુ કાર્યમૃણં ક્વચિત્ ॥ ૧૨૫॥

સ્વશિષ્યાર્પિતધાન્યસ્ય કર્તવ્યો વિક્રયો ન ચ ।
જીર્ણં દત્વા નવીનં તુ ગ્રાહ્યં તન્નૈવ વિક્રયઃ ॥ ૧૨૬॥

ભાદ્રશુક્લચતુર્થ્યાં ચ કાર્યં વિઘ્નેશપૂજનમ્ ।
ઈષકૃષ્ણચતુર્દશ્યાં કાર્યાઽર્ચા ચ હનૂમતઃ ॥ ૧૨૭॥

મદાશ્રિતાનાં સર્વેષાં ધર્મરક્ષણહેતવે ।
ગુરુત્વે સ્થાપિતાભ્યાં ચ તાભ્યાં દીક્ષ્યા મુમુક્ષવઃ ॥ ૧૨૮॥

યથાધિકારં સંસ્થાપ્યાઃ સ્વે સ્વે ધર્મે નિજાશ્રિતાઃ ।
માન્યાઃ સન્તશ્ચ કર્તવ્યઃ સચ્છાસ્ત્રાભ્યાસ આદરાત્ ॥ ૧૨૯॥

મયા પ્રતિષ્ઠાપિતાનાં મન્દિરેષુ મહત્સુ ચ ।

લક્ષ્મીનારાયણાદીનાં સેવા કાર્યા યથાવિધિ ॥ ૧૩૦॥

ભગવન્મન્દિરં પ્રાપ્તો યોઽન્નાર્થી કોઽપિ માનવઃ ।
આદરાત્ સ તુ સમ્ભાવ્યો દાનેનાન્નસ્ય શક્તિતઃ ॥ ૧૩૧॥

સંસ્થાપ્ય વિપ્રં વિદ્વાંસં પાઠશાલાં વિધાપ્ય ચ ।
પ્રવર્તનીયા સદ્વિદ્યા ભુવિ યત્સુકૃતં મહત્ ॥ ૧૩૨॥

અથૈતયોસ્તુ ભાર્યાભ્યામાજ્ઞયા પત્યુરાત્મનઃ ।
કૃષ્ણમન્ત્રોપદેશશ્ચ કર્તવ્યઃ સ્ત્રીભ્ય એવ હિ ॥ ૧૩૩॥

સ્વાસન્નસમ્બન્ધહીના નરાસ્તાભ્યાં તુ કર્હિચિત્ ।
ન સ્પ્રષ્ટવ્યા ન ભાષ્યાશ્ચ તેભ્યો પશ્ય મુખ ન ચ ॥ ૧૩૪॥

ગૃહાખ્યાશ્રમિણો યે સ્યુઃ પુરુષા મદુપાશ્રિતાઃ ।
સ્વાસન્નસમ્બન્ધહીના ન સ્પૃશ્યા વિધવાશ્ચ તૈઃ ॥ ૧૩૫॥

માત્રા સ્વસ્રા દુહિત્રા વા વિજને તુ વયઃસ્થયા ।
અનાપદિ ન તૈઃ સ્થેયં કાર્યં દાનં ન યોષિતઃ ॥ ૧૩૬॥

પ્રસઙ્ગો વ્યવહારેણ યસ્યાઃ કેનાપિ ભૂપતેઃ ।
ભવેત્તસ્યાઃ સ્ત્રિયાઃ કાર્યઃ પ્રસઙ્ગો નૈવ સર્વથા ॥ ૧૩૭॥

અન્નાદ્યૈઃ શક્તિતોઽભ્યચર્યો હ્યતિથિસ્તૈર્ગૃહાગતઃ ।
દૈવં પિત્ર્યં યથાશક્તિ કર્તવ્ય ચ યથોચિતમ્ ॥ ૧૩૮॥

યાવજ્જીવં ચ શુશ્રૂષા કાર્યા માતુઃ પિતુર્ગુરોઃ ।
રોગાર્તસ્ય મનુષ્યસ્ય યથાશક્તિ ચ મામકૈઃ ॥ ૧૩૯॥

યથાશક્ત્યુદ્યમઃ કાર્યો નિજવર્ણાશ્રમોચિતઃ ।
મુષ્કચ્છેદો ન કર્તવ્યો વૃષસ્ય કૃષિવૃત્તિભિઃ ॥ ૧૪૦॥

યથાશક્તિ યથાકાલં સઙ્ગ્રહોઽન્નધનસ્ય તૈઃ ।
યાવદ્વ્યયં ચ કર્તવ્યઃ પશુમદ્ભિસ્તૃણસ્ય ચ ॥ ૧૪૧॥

ગવાદીનાં પશૂનાં ચ તૃણતોયાદિભિર્યદિ ।
સમ્ભાવનં ભવેત્ સ્વેન રક્ષ્યાસ્તે તર્હિ નાન્યથા ॥ ૧૪૨॥

સસાક્ષ્યમન્તરા લેખં પુત્રમિત્રાદિનાપિ ચ ।
ભૂવિત્તદાનાદાનાભ્યાં વ્યવહાર્યં ન કર્હિચિત્ ॥ ૧૪૩॥

કાર્યે વૈવાહિકં સ્વસ્યાન્યસ્ય વાર્ણધનસ્ય તુ ।
ભાષાબન્ધો ન કર્તવ્યઃ સસાસ્થં લેખમન્તરા ॥ ૧૪૪॥

આયદ્રવ્યાનુસારેણ વ્યયઃ કાર્યો હિ સર્વદા ।

અન્યથા તુ મહદ્દુઃખં ભવેદિત્યવધાર્યતામ્ ॥ ૧૪૫॥

દ્રવ્યસ્યાયો ભવેદ્યાવાન્ વ્યયો વા વ્યાવહારિકે ।
તૌ સંસ્મૃત્ય સ્વયં લેખ્યૌ સ્વક્ષરૈઃ પ્રતિવાસરમ્ ॥ ૧૪૬॥

નિજવૃત્ત્યુદ્યમપ્રાપ્તધનધાન્યાદિતશ્ચ તઃ ।
અર્પ્યો દશાશઃ કૃષ્ણાય વિંશોऽશસ્ત્વિહ દુર્બલૈઃ ॥ ૧૪૭॥

એકાદશીમુખાનાં ચ વ્રતાનાં નિજશક્તિતઃ ।
ઉદ્યાપનં યથાશાસ્ત્રં કર્તવ્યં ચિન્તિતાર્થદમ્ ॥ ૧૪૮॥

કર્તવ્યં કારણીયં વા શ્રાવણે માસિ સર્વથા ।
બિલ્વપત્રાદિભિઃ પ્રીત્યા શ્રીમહાદેવપૂજનમ્ ॥ ૧૪૯॥

સ્વાચાર્યાન્ન ઋણં ગ્રાહ્યં શ્રીકૃષ્ણસ્ય ચ મન્દિરાત્ ।
તાભ્યાં સ્વવ્યવહારાર્થં પાત્રભૂષાંશુકાદિ ચ ॥ ૧૫૦॥

શ્રીકૃષ્ણગુરુસાધૂનાં દર્શનાર્થં ગતૌ પથિ ।
તત્સ્થાનેષુ ચ ન ગ્રાહ્યં પરાન્નં નિજપુણ્યહૃત્ ॥ ૧૫૧॥

પ્રતિજ્ઞાતં ધનં દેયં યત્ સ્યાત્તત્ કર્મકારિણે ।
ન ગોપ્યમૃણશુદ્ધ્યાદિ વ્યવહાર્યં ન દુર્જનૈઃ ॥ ૧૫૨॥

દુષ્કાલસ્ય રિપૂણાં વા નૃપસ્યોપદ્રવેણ વા ।
લજ્જાધનપ્રાણનાશઃ પ્રાપ્તઃ સ્યાદ્યત્ર સર્વથા ॥ ૧૫૩॥

મૂલદેશોऽપિ સ સ્વેષાં સદ્ય એવ વિચક્ષણૈઃ ।
ત્યાજ્યો મદાશ્રિતૈઃ સ્થેયં ગત્વા દેશાન્તરં સુખમ્ ॥ ૧૫૪॥

આઢ્યૈસ્તુ ગૃહિભિઃ કાર્યા અહિંસા વૈષ્ણવા મખાઃ ।
તીર્થેષુ પર્વસુ તથા ભોજ્યા વિપ્રાશ્ચ સાધવઃ ॥ ૧૫૫॥

મહોત્સવા ભગવતઃ કર્તવ્યા મન્દિરેષુ તૈઃ ।
દેયાનિ પાત્રવિપ્રેભ્યો દાનાનિ વિવિધાનિ ચ ॥ ૧૫૬॥

મદાશ્રિતૈર્નૃપૈર્ધર્મશાસ્ત્રમાશ્રિત્ય ચાખિલાઃ ।
પ્રજાઃ સ્વાઃ પુત્રવત્પાલ્યા ધર્મ સ્થાપ્યો ધરાતલે ॥ ૧૫૭॥

રાજ્યાઙ્ગોપાયષડ્વર્ગા જ્ઞેતાસ્તીર્થાનિ ચાઞ્જસા ।
વ્યવહારવિદઃ સભ્યા દણ્ડ્યાદણ્ડ્યાશ્ચ લક્ષણૈઃ ॥ ૧૫૮॥

સભર્તૃકાભિર્નારીભિઃ સેવ્યઃ સ્વપતિરીશવત્ ।
અન્ધો રોગી દરિદ્રો વા ષણ્ઢો વાચ્યં ન દુર્વચઃ ॥ ૧૫૯॥

રૂપયૌવનયુક્તસ્ય ગુણિનોऽન્યનરસ્ય તુ ।

પ્રસઙ્ગો નૈવ કર્તવ્યસ્તાભિઃ સાહજિકોઽપિ ચ ॥ ૧૬૦॥

નરેક્ષ્યનાભ્યૂરુકુચાઽનુત્તરીયા ચ નો ભવેત્ ।
સાધ્વી સ્વી ન ચ ભણ્ડેક્ષા ન નિર્લજ્જાદિસઙ્ગિની ॥ ૧૬૧॥

ભૂષાસદંશુકધૃતિઃ પરગેહોપવેશનમ્ ।
ત્યાજ્ય હાસ્યાદિ ચ સ્ત્રીભિઃ પત્યૌ દેશાન્તરં ગતે ॥ ૧૬૨॥

વિધવાભિસ્તુ યોષાભિઃ સેવ્યઃ પતિધિયા હરિઃ ।
આજ્ઞાયાં પિતૃપુત્રાદેર્વૃત્યં સ્વાતન્ત્ર્યતો ન તુ ॥ ૧૬૩॥

સ્વાસન્નસમ્બન્ધહીના નરાઃ સ્પૃશ્યા ન કર્હિચિત્ ।
તરુણૈસ્તૈથ તારુણ્યે ભાષ્યં નાવશ્યકં વિના ॥ ૧૬૪॥

સ્તનન્ધયસ્ય નુઃ સ્પર્શે ન દોષોઽસ્તિ પશોરિવ ।
આવશ્યકે ચ વૃદ્ધસ્ય સ્પર્શે તેન ચ ભાષણે ॥ ૧૬૫॥

વિદ્યાનાસન્નસમ્બન્ધાત્તાભિઃ પાઠ્યા ન કાપિ નુઃ ।
વ્રતોપવાસૈઃ કર્તવ્યો મુહુર્દેહદમસ્તથા ॥ ૧૬૬॥

ધનં ચ ધર્મકાર્યેઽપિ સ્વનિર્વાહોપયોગિ યત્ ।
દેયં તાભિર્ન તત્ ક્વાપિ દેયં ચેદધિકં તદા ॥ ૧૬૭॥

કાર્યશ્ચ સકૃદાહારસ્તાભિઃ સ્વાપસ્તુ ભૂતલે ।
મૈથુનાસક્તયોર્વીક્ષા ક્વાપિ કાર્યા ન દેહિનોઃ ॥ ૧૬૮॥

વેષો ન ધાર્યસ્તાભિશ્ચ સુવાસિન્યાઃ સ્ત્રિયાસ્તથા ।
ન્યાસિન્યા વીતરાગાયા વિકૃતશ્ચ ન કર્હિચિત્ ॥ ૧૬૯॥

સઙ્ગો ન ગર્ભપાતિન્યાઃ સ્પર્શઃ કાર્યશ્ચ યોષિતઃ ।
શૃઙ્ગારવાર્તા ન નૃણાં કાર્યાઃ શ્રવ્યા ન વૈ ક્વચિત્ ॥ ૧૭૦॥

નિજસમ્બન્ધિભિરપિ તારુણ્યે તરુણૈર્નરૈઃ ।
સાકં રહસિ ન સ્થેયં તાભિરાપદમન્તરા ॥ ૧૭૧॥

ન હોલાખેલનં કાર્યં ન ભૂષાદેશ્ચ ધારણમ્ ।
ન ધાતુસૂત્રયુક્સૂક્ષ્મવસ્ત્રાદેરપિ કર્હિચિત્ ॥ ૧૭૨॥

સધવાવિધવાભિશ્ચ ન સ્નાતવ્યં નિરમ્બરમ્ ।
સ્વરજોદર્શનં સ્વીભિર્ગોપનીયં ન સર્વથા ॥ ૧૭૩॥

મનુષ્યં ચાંશુકાદીનિ નારી ક્વાપિ રજઃસ્વલા ।
દિનત્રયં સ્પૃશેન્નૈવ સ્નાત્વા તુર્યેઽહ્નિ સા સ્પૃશેત્ ॥ ૧૭૪॥

નૈષ્ઠિકવ્રતવન્તો યે વર્ણિનો મદુપાશ્રયાઃ ।

તૈઃ સ્પૃશ્યા ન સ્ત્રિયો ભાષ્યા ન ન વીક્ષ્યાશ્ચ તા ધિયા ॥ ૧૭૫॥

તાસાં વાર્તા ન કર્તવ્યા ન શ્રવ્યાશ્ચ કદાચન ।
તત્પાદચારસ્થાનેષુ ન ચ સ્નાનાદિકાઃ ક્રિયાઃ ॥ ૧૭૬॥

દેવતાપ્રતિમાં હિત્વા લેખ્યા કાષ્ઠાદિજાપિ વા ।
ન યોષિત્પ્રતિમા સ્પૃશ્યા ન વીક્ષ્યા બુદ્ધિપૂર્વકમ્ ॥ ૧૭૭॥

ન સ્ત્રીપ્રતિકૃતિઃ કાર્યા ન સ્પૃશ્યં યોષિતોંઽશુકમ્ ।
ન વીક્ષ્યં મૈથુનપરં પ્રાણિમાત્રં ચ તૈર્ધિયા ॥ ૧૭૮॥

ન સ્પૃશ્યો નેક્ષણીયશ્ચ નારીવેષધરઃ પુમાન્ ।
ન કાર્યં સ્ત્રીઃ સમુદ્દિશ્ય ભગવદ્ગુણકીર્તનમ્ ॥ ૧૭૯॥

બ્રહ્મચર્યવ્રતત્યાગપરં વાક્યં ગુરોરપિ ।
તૈર્ન માન્યં સદા સ્થેયં ધીરૈસ્તુષ્ટૈરમાનિભિઃ ॥ ૧૮૦॥

સ્વાતિનૈકટ્યમાયાન્તી પ્રસભં વનિતા તુ યા ।
નિવારણીયા સાભાષ્ય તિરસ્કૃત્યાપિ વા દ્રુતમ્ ॥ ૧૮૧॥

પ્રાણાપદ્યુપન્નાયાં સ્ત્રીણાં સ્વેષાં ચ વા ક્વચિત્ ।
તદા સ્પૃષ્ટ્વાપિ તદ્રક્ષા કાર્યા સમ્ભાષ્ય તાશ્ચ વા ॥ ૧૮૨॥

તૈલાભ્યઙ્ગો ન કર્તવ્યો ન ધાર્યં ચાયુધં તથા ।
વેષો ન વિકૃતો ધાર્યો જેતવ્યા રસના ચ તૈઃ ॥ ૧૮૩॥

પરિવેષણકર્ત્રી સ્યાદ્યત્ર સ્ત્રી વિપ્રવેશ્મનિ ।
ન ગમ્યં તત્ર ભિક્ષાર્થં ગન્તવ્યમિતરત્ર તુ ॥ ૧૮૪॥

અભ્યાસો વેદશાસ્ત્રાણાં કાર્યશ્ચ ગુરુસેવનમ્ ।
વર્જ્યઃ સ્ત્રીણામિવ સ્ત્રૈણપુંસાં સઙ્ગશ્ચ તૈઃ સદા ॥ ૧૮૫॥

ચર્મવારિ ન વૈ પેયં જાત્યા વિપ્રેણ કેનચિત્ ।
પલાણ્ડુલશુનાદ્યં ચ તેન ભક્ષ્યં ન સર્વથા ॥ ૧૮૬॥

સ્નાનં સન્ધ્યાં ચ ગાયત્રીજપં શ્રીવિષ્ણુપૂજનમ્ ।
અકૃત્વા વૈશ્વદેવં ચ કર્તવ્યં નૈવ ભોજનમ્ ॥ ૧૮૭॥

સાધવો યેઽથ તૈઃ સર્વૈર્નૈષ્ઠિકબ્રહ્મચારિવત્ ।
સ્ત્રીસ્ત્રૈણસઙ્ગાદિ વર્જ્યં જેતવ્યાશ્ચાન્તરારયઃ ॥ ૧૮૮॥

સર્વેન્દ્રિયાણિ જેયાનિ રસના તુ વિશેષતઃ ।
ન દ્રવ્યસઙ્ગ્રહઃ કાર્યઃ કારણીયો ન કેનચિત્ ॥ ૧૮૯॥

ન્યાસો રક્ષ્યો ન કસ્યાપિ પેય ત્યાજ્યં ન કર્હિચિત્ ।

ન પ્રવેશયિતવ્યા ચ સ્વાવાસે સ્ત્રી કદાચન ॥ ૧૯૦॥

ન ચ સઙ્ગં વિના રાત્રૌ ચલિતવ્યમનાપદિ ।
એકાકિભિર્ન ગન્તવ્ય તથા ક્વાપિ વિનાપદમ્ ॥ ૧૯૧॥

અનર્ઘ્યં ચિત્રિતં વાસઃ કુસુમ્ભાદ્યૈશ્ચ રઞ્જિતમ્ ।
ન ધાર્યં ચ મહાવસ્ત્રં પ્રાપ્તમન્યેચ્છયાપિ તત્ ॥ ૧૯૨॥

ભિક્ષાં સભાં વિના નૈવ ગન્તવ્યં ગૃહિણો ગૃહમ્ ।
વ્યર્થઃ કાલો ન નેતવ્યો ભક્તિં ભગવતો વિના ॥ ૧૯૩॥

પુમાનેવ ભવેદ્યત્ર પક્વાન્નપરિવેષણઃ ।
ઈક્ષણાદિ ભવેન્નૈવ યત્ર સ્ત્રીણાં ચ સર્વથા ॥ ૧૯૪॥

તત્ર ગૃહિગૃહે ભોક્તું ગન્તવ્યં સાધુભિર્મમ ।
અન્યથામાન્નમર્થિત્વા પાકઃ કાર્યઃ સ્વયં ચ તૈઃ ॥ ૧૯૫॥

આર્ષભો ભરતઃ પૂર્વં જડવિપ્રો યથા ભુવિ ।
અવર્તતાત્ર પરમહંસૈર્વૃત્ય તથૈવ તૈઃ ॥ ૧૯૬॥

વર્ણિભિઃ સાધુભિશ્ચૈતેર્વર્જનીયં પ્રયત્નતઃ ।
તામ્બૂલસ્યાહિફેનસ્ય તમાલાદેશ્ચ ભક્ષણમ્ ॥ ૧૯૭॥

સંસ્કારેષુ ન ભોક્તવ્યં ગર્ભાધાનમુખેષુ તૈઃ ।
પ્રેતશ્રાદ્ધેષુ સર્વેષુ શ્રાદ્ધે ચ દ્વાદશાહ્નિકે ॥ ૧૯૮॥

દિવાસ્વાપો ન કર્તવ્યો રોગાદ્યાપદમન્તરા ।
ગ્રામ્યવાર્તા ન કાર્યા ચ ન શ્રવ્યા બુદ્ધિપૂર્વકમ્ ॥ ૧૯૯॥

સ્વપ્યં ન તૈશ્ચ ખટ્વાયાં વિના રોગાદિમાપદમ્ ।
નિશ્છદ્મ વર્તિતવ્યં ચ સાધૂનામગ્રતઃ સદા ॥ ૨૦૦॥

ગાલિદાનં તાડનં ચ કૃતં કુમતિભિર્જનૈઃ ।
ક્ષન્તવ્યમેવ સર્વેષાં ચિન્તનીયં હિતં ચ તૈઃ ॥ ૨૦૧॥

દૂતકર્મ ન કર્તવ્યં પૈશુનં ચારકર્મ ચ ।
દેહેઽહન્તા ચ મમતા ન કાર્યા સ્વજનાદિષુ ॥ ૨૦૨॥

ઇતિ સઙ્ક્ષેપતો ધર્માઃ સર્વેષાં લિખિતા મયા ।
સામ્પ્રદાયિકગ્રન્થેભ્યો જ્ઞેય એષાં તુ વિસ્તરઃ ॥ ૨૦૩॥

સચ્છાસ્ત્રાણાં સમુદ્ધૃત્ય સર્વેષાં સારમાત્મના ।
પત્રીયં લિખિતા નૃણામભીષ્ટફલદાયિની ॥ ૨૦૪॥

ઇમાવેવ તતો નિત્યમનુસૃત્ય મમાશ્રિતૈઃ ।

યતાત્મભિર્વર્તિતવ્યં ન તુ સ્વૈરં કદાચન ॥ ૨૦૫॥

વર્તિષ્યન્તે ય ઇત્થં હિ પુરુષા યોષિતસ્તદા ।
તે ધર્માદિચતુર્વર્ગસિદ્ધિં પ્રાપ્સ્યન્તિ નિશ્ચિતમ્ ॥ ૨૦૬॥

નેત્થં ય આચરિષ્યન્તિ તે ત્વસ્મત્સમ્પ્રદાયતઃ ।
બહિર્ભૂતા ઇતિ જ્ઞેયં સ્ત્રીપુંસૈઃ સામ્પ્રદાયિકૈઃ ॥ ૨૦૭॥

શિક્ષાપત્ર્યાઃ પ્રતિદિનં પાઠોઽસ્યા મદુપાશ્રિતૈઃ ।
કર્તવ્યોઽનક્ષરજ્ઞૈસ્તુ શ્રવણં કાર્યમાદરાત્ ॥ ૨૦૮॥

વક્ત્રભાવે તુ પૂજૈવ કાર્યાસ્યાઃ પ્રતિવાસરમ્ ।
મદ્રૂપમિતિ મદ્વાણી માન્યેયં પરમાદરાત્ ॥ ૨૦૯॥

યુક્તાય સમ્પદા દૈવ્યા દાતવ્યેયં તુ પત્રિકા ।
આસુર્યા સમ્પદાઢ્યાય પુંસે દેયા ન કર્હિચિત્ ॥ ૨૧૦॥

વિક્રમાર્કશકસ્યાબ્દે નેત્રાષ્ટવસુભૂમિતે ।
વસન્તાદ્યદિને શિક્ષાપત્રીય લિખિતા શુભા ॥ ૨૧૧॥

નિજાશ્રિતાનાં સકલાર્તિહન્તા
સધર્મભક્તેરવન વિધાતા ।
દાતા સુખાનાં મનસેપ્સિતાનાં
તનોતુ કૃષ્ણોઽખિલમઙ્ગલં નઃ ॥ ૨૧૨॥

॥ ઇતિ શ્રીસહજાનન્દસ્વામિલિખિતા શિક્ષાપત્રી સમાપ્તા ॥

આવાહન મન્ત્રઃ ॥

ઉત્તિષ્ઠોત્તિષ્ઠ હે નાથ સ્વામિનારાયણ પ્રભો ।
ધર્મસૂનો દયાસિન્ધો સ્વેષાં શ્રેયઃ પરં કુરુ ॥

આગચ્છ ભગવન્ દેવ સ્વસ્થાનાત્ પરમેશ્વર ।
અહં પૂજાં કરિષ્યામિ સદા ત્વં સમ્મુખો ભવ ॥

શરણ મન્ત્રઃ ॥

કાલમાયાપાપકર્મયમદૂતભયાદહમ્ ।
શ્રીહરિં શરણં ધાર્મિં પ્રપન્નોઽસ્મિ સ પાતુ મામ્ ॥

વિસર્જન મન્ત્રઃ ॥

સ્વસ્થાનં ગચ્છ દેવેશ પૂજામાદાય મામકીમ્ ।
ઇષ્ટકામપ્રસિદ્ધ્યર્થં પુનરાગમનાય ચ ॥

સ્મરણ મન્ત્રઃ ॥

ॐ શ્રી સ્વામિનારાયણબાપા સ્વામીબાપા ભગવતે નમઃ ॥

Proofread by DPD

.. shikShApatrI sahajAnandasvAmIvirachitA ..
was typeset on August 2, 2016

Please send corrections to sanskrit@cheerful.com